दैनिकम् ई-संस्कृतवार्तापत्रम्
# हिमसंस्कृतवार्ता

**पञ्चाङ्गम्**
वि.सं. २०८३,
कलियुगाब्धः ५१२७ वर्षा-ऋतुः
सूर्यः दक्षिणायनम् आषाढ़कृष्णप्रतिपदा
आषाढः 16 प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-4 ■ वर्ष-5 ■ अङ्क-248 | 1 | जून 30, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 TET UPDATE - २०१० तमवर्षात् पूर्वं नियुक्तेभ्यः शिक्षकेभ्यः टी.ई.टी. अनिवार्या न, एन.सी.टी.ई. इत्यनेन स्पष्टीकृतम्

3 दिल्लीति राष्ट्रिय-राजधानी-क्षेत्रे एस. आई. आर. इत्युक्ते मतदातृणां विशेष-गहन-पुनरीक्षण इति अभियानं प्रारब्धम्

4 सर्वकारः पेट्रोल-डीजल-इन्धनयोः विक्रयणं वितरणं च नियन्त्रयतः अस्थायी-नियामक-उपायान् प्रत्यहतवान्

## राष्ट्रपतिः द्रौपदीमुर्मुः नवदेहल्यां राष्ट्रपतिभवने शौर्यपुरस्कारान् प्रदत्तवती



हिमसंस्कृतवार्ता। नवदिल्ल्यां राष्ट्रपतिभवने षड्विंशत्यधिक-द्विसहस्रतम-वर्षस्य द्वितीय-रक्षा-अलंकरण-समारोहे राष्ट्रपतिः द्रौपदी मुर्मु-वर्या शौर्यपुरस्कारान् प्रदत्तवती। शौर्य पुरस्काराः रक्षासैन्य-बालानां, केन्द्रीय-सशस्त्र-आरक्षक-बलानां, राज्य-केन्द्र-शासित-आरक्षकाणां कार्मिकाणां च कृते प्रदीयन्ते। एते पुरस्काराः सशस्त्र बलानां, केन्द्रीय सशस्त्र-आरक्षि-बलानां, अन्य-सुरक्षा-अभिकरणानां च कार्मिकाणां असाधारण-शौर्य-कार्यान् उद्दिश्य दीयन्ते। एयर मार्शल तरुण चौधरी, लेफ्टिनेण्ट् जनरल नीरज वार्ष्णेयः, लेफ्टिनेण्ट जनरल् विकास् रोहेला, लेफ्टिनेण्ट जनरल हरविन्दर सिंह वन्द्रा, लेफ्टिनेण्ट जनरल मोहिन्दर पाल सिंहः च अति-विशिष्ट-सेवा-पदकम् प्राप्तवन्तः । उपराष्ट्रपतिः सी. पी. राधाकृष्णन् वर्यः, रक्षामंत्री राजनाथसिंहः, अन्ये केन्द्रीयमन्त्रिणः, सशस्त्रसेनायाः वरिष्ठाः अधिकारिणः च अस्मिन् अवसरे उपस्थिताः आसन्। राष्ट्रपतिः मुर्मुः वर्या इतः पूर्वम् अस्मिन् मासे अष्ट दिनाङ्के राष्ट्रपतिभवने रक्षा-अलंकरण-समारोहे प्रथम चरणस्य शौर्यपुरस्कारान् प्रदत्तवती ।

## प्रधानमन्त्री सेशेल्स-देशस्य त्रिदिवसीयं सफलं भ्रमणम् समाप्य भारतं सम्प्राप्तः



प्रधानमन्त्री नरेन्द्रमोदी अफ्रिका-देशस्य यात्रायाः तृतीयदिने सेशेल्स्-देशस्य विक्टोरिया-नगरस्थस्य नवशक्ति-विनयगर-देवालयं गत्वा प्रार्थनां कृतवान्। सः तत्र भारतीयप्रवासिभिः अपि मिलितवान्। पश्चात्, पीस-पार्क इत्यत्र स्थितायाः महात्मागान्धिनः प्रतिमायाः उपरि पुष्पांजलिमपि अर्पितवान्। प्रधानमन्त्री सेशेल्स-देशस्य त्रिदिवसीयं सफलं भ्रमणम् समाप्य भारतं सम्प्राप्तः, इतः पूर्वञ्च प्रधानमन्त्री मोदी सेशेल्स-देशस्य राष्ट्रियदिवसस्य समारोहे भागम् अगृह्णात्, यत्र देशस्य स्वतन्त्रतायाः पञ्चाशत् वर्षपूर्तिसमारोहः आयोजितः आसीत्। श्रीमोदी सम्माननीय-अतिथि-रूपेण उत्सवे भागम् अगृह्णात्। सेशेल्स-देशस्य राष्ट्रपतिना डा. पैट्रिक् हर्मिनी-वर्यस्य आमन्त्रणे आयोजितेऽस्मिन् भ्रमणे, द्वयोः नेत्रोः मध्ये स्वास्थ्य सेवा, शिक्षा, क्षमता-निर्माणम्, समुद्रीय-सुरक्षा, रक्षा इत्यादिषु क्षेत्रेषु सहकारादीषु विषयेषु विस्तृतरूपेण वार्तालापः अभवत्। प्रधानमन्त्री नरेन्द्रमोदी अवदत् यत् तस्य सेशेल्स-देशस्य यात्रा महत्त्वपूर्णैः परिणामैः पूरितम् अस्ति येन भारत-सेशेल्स-देशयोः मैत्री प्रवर्धिता भविष्यति। सामाजिकान्तर्जालीये सन्देशे प्रधानमन्त्री अवदत् यत् विगतपञ्चदशवर्षेषु उभयोः देशयोः मध्ये सम्बन्धः सुदृढविश्वासेन, संयुक्तप्रगतिना च चिह्नितः अस्ति, यदा तु अगामि पञ्चाशत् वर्षाणि नवान्वेषणेन, सुस्थिरतया, संयुक्तसमृद्ध्या च निर्धारिताः भविष्यन्ति। सः सेशेल्स-देशस्य स्वातन्त्र्यस्य पञ्चाशततमे वर्षे आचर्यमाणस्य राष्ट्रियदिवसस्य समारोहे भाग-ग्रहणाय हर्षं प्रकटितवान्। श्रीमोदी सेशेल्स-देशस्य राष्ट्रपत्ये डा. पैट्रिक् हर्मिनी इत्यस्मै, सेशेल्स-देशस्य सर्वकाराय, जनानां च स्नेहाय धन्यवादम् अददात्।

## सर्वोच्चन्यायालयेन राममन्दिर-दान-प्रकरणस्य कथित-वित्तीय-अनियमिततायाः न्यायालय-निरीक्षण-अन्वेषणस्य त्वरा याचिका निराकृता

सर्वोच्चन्यायालयेन श्रीरामजन्मभूमि-तीर्थक्षेत्र न्यासेन प्राप्तानां दानानां कथित-वित्तीय-अनियमिततानां विषये न्यायालयस्य निरीक्षणेन अन्वेषणं तथा फोरेन्सिक लेखापरीक्षणञ्च याच्यमानस्य पी. आई. एल. इत्यस्य त्वरित-विचारावेदनम् निराकृतम्। न्यायमूर्ती एम.एम. सुन्दरेशः शील नागुः च अत्यावश्यकतायाः विषये प्रश्नम् अकुरुताम्, ग्रीष्मकालस्य विरामस्य अनन्तरं न्यायालयस्य पुनः उद्घाटनानन्तरं च याचिकायाः सूचीकरणं करणीयम् इति निर्देशमपि दत्तवन्तौ।

### गृहमन्त्रिणः अमितशाहस्य उपस्थितौ हरियाणा-राजस्थानयोर्मध्ये दशकत्रयेभ्यः विलम्बितायाः यमुना-जलविभाजन-विवादस्य समाधानं जातम्

गृहमन्त्रिणः अमितशाहस्य उपस्थितौ नवदेहल्यां हरियाणा-राजस्थानयोः सर्वकारयोः यमुना-जल-परियोजनायाः निर्माणाय कार्यान्वयनाय च सन्धिपत्रेषु हस्ताक्षराणि जातानि । अवसरेऽस्मिन् भाषमाणः श्रीशाहः अवदत् यत् अनया सन्ध्या हरियाणा-राजस्थानयोः जनानां प्रायः दशकत्रय-पुरातना जलसम्बद्ध समस्या समापिताऽस्ति। सः अवदत् यत् एषा सहमतिः प्रधानमन्त्रिणा नरेन्द्रमोदिना प्रदत्तस्य समाधान-मन्त्रस्य उत्कृष्टम् उदाहरणम् अस्ति ।

### उपहिमालयीय-पश्चिमबङ्गक्षेत्रे, सिक्किम्-प्रदेशे च प्रचण्डतः अतिप्रचण्डतरायाः वर्षायाः पूर्वानुमानम्

भारत-ऋतु-विज्ञान-विभागेन श्वस्तनं यावत् उपहिमालयीय-पश्चिमबङ्गक्षेत्रे, सिक्किम्-प्रदेशे च प्रचण्डतः अतिप्रचण्डतरायाः वर्षायाः पूर्वानुमानं कृतमस्ति। बुधवासरं यावत् अरुणाचलप्रदेशे, असम-राज्ये, मेघालये, केरलम्-राज्ये, माही-प्रदेशे च प्रचण्डवृष्टिः भविष्यतीप्यपि ऋतु-विभागेन पूर्वानुमानं कृतम्।

## सुभाषितम्

**रहस्यभेदो याञ्चा च, नैष्ठुर्यं चलचित्तता।**
**क्रोधो निःसत्यता द्यूतम् एतन्मित्रस्य दूषणम्।।**
**(हितोपदेश, मित्रलाभ- ९८)**

अर्थात्- गुप्त बात को प्रकट करना, धन आदि की याचना, कठोरता, चित्त की चंचलता, क्रोध, असत्य और जुआ खेलना ये मित्र के दोष होते हैं।




### साम्प्रतिकाय दशमवर्गाय त्रिभाषा-नीतिः न अनिवार्या - सी.बी.एस.ई.

केन्द्रीय-माध्यमिक-शिक्षा-परिषदा त्रिभाषा नीतिविषये मार्गदर्शिका प्रसारिता। एकस्मिन् वक्तव्ये बोर्ड इत्ययम् अवदत् यत् साम्प्रतिकः दशम-वर्गः नूतनभाषानीतेः अनुसरणं न करिष्यति। सप्त-अष्ट-नवेति वर्गेषु अध्ययनं कुर्वतां वर्तमानानां छात्राणां कृते एषा नीतिः अस्ति, अग्रिमवर्षादारभ्य एव दशमवर्गीय छात्रेभ्योऽपि तृतीयभाषायाः नीतिः अनिवार्या भविष्यति। सी. बी. एस. ई. इत्यपि अकथयत् यत् सप्त-अष्ट-नवेति श्रेण्याः छात्राः, ये पूर्वमेव विदेशीयभाषाद्वयं स्वीकृतवन्तः, ते एकस्याः अतिरिक्तस्य देशीय-भाषायाः अध्ययनं कुर्वन्तः तथैव अनुवर्तयितुं अनुमताः भविष्यन्तीति।

# TET UPDATE - २०१० तमवर्षात् पूर्वं नियुक्तेभ्यः शिक्षकेभ्यः टी.ई.टी. अनिवार्या न, एन.सी.टी.ई. इत्यनेन स्पष्टीकृतम्




**हिमसंस्कृतवार्ताः- कार्यालयीयः प्रतिनिधिः।** शिक्षक-पात्रता-परीक्षां (टी.ई.टी.) अधिकृत्य सुदीर्घकालात् प्रचलिता असमञ्जसस्थितिः अधुना भूयसा स्पष्टा संजाता। राष्ट्रियाध्यापक-शिक्षापरिषदा (NCTE) न्यायालये प्रस्तुते स्वशपथपत्रे स्पष्टीकृतं यत् २३ अगस्त २०१० तमवर्षात् पूर्वं नियुक्तेषु शिक्षकेषु टी.ई.टी. परीक्षायाः अनिवार्यता नैव प्रवर्तिष्यते। एतादृश्यां स्थितौ वर्ष २०१० तः पूर्वं नियुक्ताः सर्वेऽपि शिक्षकाः टी.ई.टी. परीक्षायाम् उत्तीर्णाः स्युः, एषा धारणा समीचीना नास्ति।

शिक्षकाणां मध्ये सुदीर्घकालात् एषः प्रश्नः उत्तिष्ठति स्म यत् किं पुरातनीषु नियुक्तिष्वपि टी.ई.टी. परीक्षायाः नियमः प्रवृत्तः भविष्यति। एन.सी.टी.ई. इत्यनेन स्वप्रतिज्ञापत्रे नियुक्तितिथेः आधारेण विभिन्नाः स्थितयः स्पष्टीकृताः।

## ३ सितम्बर २००१ तमवर्षात् पूर्वं नियुक्तेभ्यः शिक्षकेभ्यः पूर्णसाहाय्यम्

शपथपत्रानुसारं ३ सितम्बर २००१ तमवर्षात् पूर्वं नियुक्ताः शिक्षकाः टी.ई.टी. परीक्षायाः सर्वथा मुक्ताः सन्ति। केवलं टी.ई.टी. परीक्षायाः अनुत्तीर्णतायाः आधारेण तेषां सेवायाम् नियुक्तौ वा कोऽपि प्रतिकूलः प्रभावः न भविष्यति। परिषदा स्पष्टीकृतं यत् पश्चात् प्रवृत्ताः पात्रतानियमाः पूर्वप्रभावेण प्रयोक्तुं न शक्यन्ते।

## २००१ तः २३ अगस्त २०१० पर्यन्तं नियुक्तेषु शिक्षकेष्वपि टी.ई.टी. न प्रवर्तिष्यते

एन.सी.टी.ई. इत्यनेन एतदपि स्पष्टीकृतं यत् ३ सितम्बर २००१ तः २३ अगस्त २०१० तमवर्षस्य मध्ये नियुक्तेभ्यः शिक्षकेभ्यः अपि टी.ई.टी. परीक्षा अनिवार्या नासीत्, यतः तस्मिन् काले एषा व्यवस्था अस्तित्वे एव नासीत्। अतः तस्याम् अवधौ प्रवृत्तानां नियमानाम् अन्तर्गतं संजाताः नियुक्तयः वैधाः मन्स्यन्ते। शिक्षाक्षेत्रस्य विशेषाज्ञानां मन्यते यत् तस्मिन् काले ये नियमाः प्रभाविनः आसन्, तदाधारेण विहिताः नियुक्तयः पश्चात् प्रवृत्त- पात्रता- परीक्षया सह योक्तुं न शक्यन्ते।

## २३ अगस्त २०१० तमवर्षात् परं टी.ई.टी. अनिवार्या

२३ अगस्त २०१० तमे दिनाङ्के एन.सी.टी.ई. इत्यनेन अधिसूचनां प्रसार्य प्राथमिक-उच्चप्राथमिकस्तरयोः शिक्षकाणां नियुक्तये टी.ई. टी. परीक्षा आवश्यकी पात्रता घोषिता आसीत्। एतस्मात् परं नियुक्तानां शिक्षकाणां कृते टी.ई.टी. परीक्षायाः उत्तीर्णता अनिवार्या मन्स्यते।

## सहस्रशः शिक्षकेभ्यः लब्धं साहाय्यम्

एन.सी.टी.ई. इत्यस्य अस्य स्पष्टदृष्टिकोणस्य कारणेन प्रदेशसहित-देशस्य तादृशेभ्यः सहस्रशः शिक्षकेभ्यः साहाय्यप्राप्तेः आशा अस्ति, येषां नियुक्तिः टी.ई.टी. नियमात् पूर्वं संजाता आसीत्, ये च स्वसेवा-सुरक्षां प्रति असमञ्जसे आसन्।

## एकदृष्ट्या नियमाः-

१. ३ सितम्बर २००१ तमवर्षात् पूर्वं नियुक्ताः शिक्षकाः- टी.ई.टी. परीक्षातः मुक्ताः।
२. ३ सितम्बर २००१ तः २३ अगस्त २०१० तमवर्षस्य मध्ये नियुक्ताः शिक्षकाः- टी.ई.टी. अनिवार्या न।
३. २३ अगस्त २०१० तमवर्षात् परं नियुक्ताः शिक्षकाः- टी.ई.टी. परीक्षा अनिवार्या।

# कर्मचारिभ्यः वृत्तिभोगिभ्यश्च साहाय्यम्

## चिकित्सा- प्रतिपूर्ति- देयकानां राश्यर्पणाय सर्वकारेण २१२ कोटिरूप्यकाणि विमोचितानि



**हिमसंस्कृतवार्ताः- शिमला।** मुख्यमन्त्रिणः सुखविन्दरसिंहसुक्खु महोदयस्य नेतृत्वे राज्यसर्वकारेण विधीयमानस्य 'व्यवस्था-परिवर्तनस्य' आनुषङ्गिकाः परिणामाः अधुना आर्थिकमञ्चे स्पष्टरूपेण परिलक्ष्यन्ते। वित्तीयानुशासनस्य, संसाधनानां श्रेष्ठप्रबन्धनस्य, जनहितस्य च सर्वोपरि-प्राथमिकतायाः नीतेः कारणेन काङ्ग्रेससर्वकारः कर्मचारिणां पेंशनभोगिनां च सुदीर्घकालात् प्रलम्बितानां वित्तीयलाभानां तीव्रगत्या निस्तारणं करोति। अस्मिन्नेव क्रमे वित्तवर्षे २०२६-२७ मध्ये २७ जून दिनाङ्क यावत् राज्यसर्वकारेण चिकित्सा-प्रतिपूर्ति-देयकानां प्रदानाय २१२ कोटि रूप्यकाणि विमोचितानि। एतेषु १३१.०३ कोटिरूप्यकाणि पेंशनभोगिभ्यः, ८०.९७ कोटिरूप्यकाणि सर्वकारीयकर्मचारिणां चिकित्सा- प्रतिपूर्ति-आक्षेपानां प्रदानाय मुक्तानि कृतानि सन्ति। मुख्यमन्त्रिणः निर्देशानुसारं वित्तविभागेन कर्मचारिणां पेंशनभोगिनां च प्रलम्बितानां चिकित्सा- प्रतिपूर्ति-आक्षेपानां सद्यः प्रदानाय एषा धनराशिः मुक्ता। कर्मचारिणः पेंशनभोगिणश्च स्वचिकित्साप्रतिपूर्तेः राश्यर्पणसम्बन्धे स्वकीयेन आहरण- वितरण- अधिकारिणा सह सम्पर्कं कर्तुं शक्नुवन्ति। वर्तमानसर्वकारः कर्मचारिणां पेंशनभोगिनां च कल्याणाथं निरन्तरं दृढानि पदानि उत्थापयन् अस्ति। वर्षेभ्यः प्रलम्बितानां वित्तीयदायित्वानां चरणबद्धं समाधानं कृत्वा काङ्ग्रेससर्वकारेण एतत् प्रमाणितं यत् कर्मचारिणां पेंशनभोगिनां च हितैः सह किमपि सन्धिः न विधास्यते।

## चतुर्थश्रेणीकर्मचारिभ्यः अवशिष्ट-राशिः मुक्ता

काङ्ग्रेससर्वकारेण वर्ष २०१६ तः परं सेवानिवृत्तेभ्यः अथवा दिवङ्गतेभ्यः चतुर्थश्रेणीकर्मचारिभ्यः तेषाम् आश्रितपरिवारेभ्यश्च अपि महती सहायता प्रदत्ता। येषां मूलपेंशनं २५,००० रूप्यकाणि प्रतिमासं तथा च पारिवारिकपेंशनं १५,००० रूप्यकाणि प्रतिमासं यावत् अस्ति, तेषां प्रलम्बिताः अवशिष्ट-राशयः विमुक्ताः। एतदतिरिच्य मुख्यमन्त्रिणः निर्देशेन १ जनवरी २०१६ तमवर्षात् पूर्वं सेवानिवृत्तेभ्यः पेंशनभोगीभ्यः पारिवारिकपेंशनभोगिभ्यश्च संशोधितपेंशन- अवशिष्टांशस्य पूर्णं प्रदानम् अपि सुनिश्चितं विहितम्।

## मुख्यमन्त्रिणा भाजपेति दलस्य उपरि कृतः प्रहारः

मुख्यमन्त्रिणा सुखविन्दरसिंहसुक्खुना कथितं यत् पूर्वतन भाजपा-सर्वकाराय आर.डी.जी. तथा जी. एस. टी. क्षतिपूर्तेः रूपेण केन्द्रीयसर्वकारतः प्रायः ६० सहस्रकोटि (६०,००० कोटि) रूप्यकाणाम् अतिरिक्ता वित्तीयसहायता प्राप्ता आसीत्। एतस्य सत्यपि कर्मचारिभ्यः पेंशनभोगिभ्यश्च षष्ठवेतनायोगस्य एरियर-राशेः अन्येषां देय- वित्तीयलाभानां च समये प्रदानं न कृतम्। तेन उक्तं यत् अस्य विपरीतं वर्तमानकाङ्ग्रेससर्वकारेण सत्तां गृहता एव कर्मचारिणां पेंशनभोगिनां च हितानि सर्वोपरि प्राथमिकतायां स्थापितानि।

सर्वकारेण पुरातनवृत्तियोजनायाः (OPS) पुनरुद्धाराय ऐतिहासिकः निर्णयः गृहीतः तथा अधुना प्रदेशस्य वित्तीयस्थितौ उन्नयनात् साकमेव कर्मचारिणां पेंशनभोगिनां च प्रलम्बितानां वित्तीयलाभानां प्रदानम् अपि सुनिश्चितं क्रियमाणं वर्तते। तेन प्रतिपादितं यत् व्यवस्थापरिवर्तनस्य उद्देश्यं केवलं आर्थिकविकासं यावत् सीमितं नास्ति, अपि तु सर्वकारीयकर्मचारिणां, पेंशनभोगिनां, सामान्यजनानां च विश्वासस्य सुदृढीकरणम् अपि वर्तते

# मण्डी- नगरनिगम- निर्वाचनम्- सुमनठाकुर संजाता नवीना महापौर, जितेन्द्रशर्मा उपमहापौरः



**हिमसंस्कृतवार्ताः- लघ्वीकाशी मण्डी।** मण्डी-नगरनिगमे सोमवासरे संजाता महापौर-उपमहापौरयोः (मेयर-डिप्टी मेयर) निर्वाचनप्रक्रिया शान्तिपूर्णरीत्या सम्पन्ना अभवत्। सुमनठाकुरा मण्डी- नगरनिगमस्य नवीना महापौर निर्वाचिता अस्ति, यत्रैव जितेन्द्रशर्मा (जॉनी) उपमहापौरः निर्वाचितः। एतस्मात् पूर्वं पार्षदेभ्यः शपथः समारोहः कारितः। नगरनिगमकार्यालये नवनिर्वाचितैः पार्षदैः समर्थकैश्च आनक- दुन्दुभिभिः सह उत्सवः मानितः।

## विकासस्य गतिवर्धनं भविष्यति मुख्या प्राथमिकता

पदभारग्रहणात् सद्यः परमेव, नवीनमहापौरा सुमनठाकुरा उपमहापौरः जितेन्द्रशर्मा च माध्यमैः सह सम्भाषणं कुर्वन्तौ स्वप्राथमिकताः विभक्तवन्तौ। तौ अवदतां यत् मण्डीनगरस्य सुनियोजितविकासः जनानां समस्यानां समाधानं च तयोः सर्वप्रथमा प्राथमिकता भविष्यति।सुमनठाकुर कथितवती यत् मण्डीनगरस्य जनतया अस्मासु यः विश्वासः प्रकटितः, वयम् तं पूर्णरूपेण सफलीकर्तुं प्रयतैष्महे। नगरे स्वच्छता, श्रेष्ठाः मार्गाः, पेयजलापूर्तेः सुचारुव्यवस्थायाः दृढीकरणं च अस्माकं मुख्यं लक्ष्यं वर्तते।

# विकसितभारतस्य सङ्कल्पः अधिकं सुदृढः भविष्यति- अनुरागठाकुरः






**हिमसंस्कृतवार्ताः- शिमला**।पूर्वकेन्द्रीयमन्त्री सासंदश्च अनुरागसिंहठाकुरः सोमवासरे शिमलाप्रवासकाले विश्वप्रसिद्ध- जाखूमन्दिरे भगवान् हनुमद्दर्शनं कृत्वा आशीर्वादं प्राप्तवान्। एतस्मात् परं तेन 'एकं वृक्षं मातुः नाम्नि' अभियानस्य अन्तर्गतम् आयोजिते वृक्षारोपणकार्यक्रमे भागं गृहीत्वा पर्यावरणसंरक्षणस्य सङ्केतः दत्तः। अनुरागठाकुरः अवदत् यत् शिमलाम् आगच्छन् प्रत्येकः श्रद्धालुः यदि जाखूमन्दिरे हनुमानजी इत्यस्य दर्शनं न करोति, तर्हि तस्य यात्रा अपूर्णा मन्यते। एतत् स्थलं न केवलं श्रद्धायाः केन्द्रम् अस्ति, अपि तु राष्ट्रसेवायाः सकारात्मक-ऊर्जायाः च प्रतीकं वर्तते। तेन कथितं यत् भगवतः हनुमतः चरणयोः तेन प्रधानमन्त्रिणः नरेन्द्रमोदिनः उत्तमस्वास्थ्याय, दीर्घायुषे, विकसितभारतस्य सङ्कल्पस्य च सफलतायै प्रार्थना कृता। प्रधानमन्त्रिणः नरेन्द्रमोदिनः नेतृत्वे केन्द्रीयसर्वकारस्य १२ वर्षाणि सेवा- सुशासन- गरीबकल्याण-राष्ट्रनिर्माणानां स्वर्णिम-अध्यायाः अभवन्। वर्ष २०१४ मध्ये भारतं यत्र विश्वस्य १० तमा (दशमी) बृहती अर्थव्यवस्था आसीत्, तत्रैव अद्य भारतं विश्वस्य पञ्चमा बृहती अर्थव्यवस्था संजाता अस्ति, संसारे च तीव्रगत्या वर्धमानासु प्रमुखासु अर्थव्यवस्थासु सम्मिलिता अस्ति। तेन प्रतिपादितं यत् गते एकदशके २५ कोटिभ्यः (२५,००,००,०००) अधिकाः नागरिकाः दारिद्र्यरेखायाः बहिः आगताः, कोटिशः परिवारेभ्यः सुदृढगृहं, वायुकोशसंयोजनं, शौचालयम्, वित्तकोषसंख्याः, नलेन जलं, निश्शुल्कं स्वास्थ्यसुरक्षा च उपलब्धाः कृताः सन्ति। हिमाचलप्रदेशस्य सन्दर्भे अनुरागठाकुरः अवदत् यत् प्रधानमन्त्रिणः मोदिनः नेतृत्वे प्रदेशाय विकासस्य अभूतपूर्वाः उपहाराः प्राप्ताः। एम्स (AIIMS) बिलासपुरं, नूतनाः आयुर्विज्ञान- महाविद्यालयाः (मेडिकल कॉलेज), राष्ट्रियमार्गाणां व्यापकः विस्तारः, धूमशकटमार्ग- सम्पर्कसुदृढीकरणाय योजनाः, जलजीवनमिशनं, प्रधानमन्त्रावासयोजना, उज्ज्वलायोजना, प्रधानमन्त्री- ग्रामसड़क- योजना अन्याश्च जनकल्याणकारिण्यः योजनाः याभिः लक्षशः परिवाराः लाभान्विताः अभवन्। तेन उक्तं यत् प्रधानमन्त्री-ग्रामसड़क-योजनान्तर्गतं वर्ष २०२५-२६ मध्ये एव हिमाचलाय २,२४७ कोटिरूप्यकाणां व्ययेन २९४ ग्रामीणमार्गपरियोजनाभ्यः स्वीकृतिः दत्ता अस्ति, यासु प्रायः २,०१९ कोटिरूप्यकाणां केन्द्रीयभागः (अंश) अस्ति। समाननागरिकसंहिता (UCC) इति विषये पृष्टस्य प्रश्नस्य उत्तरं ददत् अनुरागठाकुरः अवदत् यत् समाननागरिकसंहिता भारतीयजनतापक्षस्य स्पष्टः सङ्कल्पः वर्तते। देवभूमि-उत्तराखण्डतः अस्य आरम्भः जातः अस्ति, आगामिसमये अन्येषु राज्येष्वपि चरणबद्धरूपेण एषा प्रवर्तिष्यते। पाकिस्तानसम्बन्धि-प्रश्ने तेन कथितं यत् पाकिस्तानं प्रायः प्रत्येकस्मिन् क्षेत्रे विफलराष्ट्रं सिद्धं संजातम्। यदि तत् कस्मिंश्चित् क्षेत्रे सफलं वर्तते, तर्हि तत् केवलम् आतङ्कवादस्य प्रोत्साहने एव अस्ति। स्वकीयानाम् आन्तरिकविफलतानाम् अव्यवस्थानां च दोषं भारतस्य उपरि पातनं तस्य पुरातन; अभ्यासः अस्ति। तेन प्रख्यापितं यत् भारतं निरन्तरं अग्रे वर्धते, यत्रैव पाकिस्तानं स्वकीयदोषपूर्णनीतीनां कारणेन संसारे एकाकी भवति।

## राजभवनं गत्वा राज्यपालेन सह अमिलत् अनुरागठाकुरः

हमीरपुर-लोकसभाक्षेत्रस्य सासंदः अनुरागसिंहठाकुरः हिमाचलप्रदेशस्य राज्यपालेन कवीन्द्रगुप्तेन सह शिमलास्थे लोकभवने शिष्टाचारमेलनं कृतवान्। तेन पारम्परिक- हिमाचलीरीत्या राज्यपालस्य अभिनन्दनं विहितं, हिमाचलस्य हितेन सम्बद्धानां विभिन्नानां विषयाणाम् उपरि च विमर्शः कृतः।सर्वकारः निर्वाचितप्रतिनिधीनाम् अवमाननां करोति- बिन्दलः नगरनिगमे महापौर-उपमहापौरयोः निर्वाचनं अधिकृत्य भाजपा-प्रदेशाध्यक्षः डॉ. राजीवबिन्दलः अवदत् यत् काङ्ग्रेससर्वकारः निर्वाचित- प्रतिनिधीनाम् अपमानं कर्तुं लग्नः अस्ति। सोलननगरे नगरनिगमपार्षदानां शपथग्रहणानन्तरं पत्रकारैः सह अनौपचारिकवार्तालापे सः अवदत् यत् ३१ दिनाङ्के (मई मासे) नगरनिगमनिर्वाचनस्य परिणामाः आगताः आसन्, परन्तु मासैकस्य अनन्तरं सर्वकारस्य प्रशासनस्य च निद्रा भग्ना, सोमवासरे च निर्वाचितानां पार्षदानां शपथग्रहणम् अकारयत्। सः अवदत् यत् काङ्ग्रेस-सर्वकारस्य समये संविधानस्य धज्जिकाः उड्डीयन्ते। जनतायाः मतमपि काङ्ग्रेस-दलम् अवहेलयति। सः आरोपं अकरोत् यत् केवलं कपटोपायान् आश्रयितुं मासमेकं यावत् काङ्ग्रेसदलेन शपथग्रहणं न कारितम्। प्रशासनं दबावे कार्यं करोति। जूनमासस्य २३ दिनाङ्के एकं पत्रं निष्कासितं, यस्मिन् लिखितं यत् २९ जूनदिनाङ्के शपथग्रहणं भविष्यति। पुनः २४ जूनदिनाङ्के अन्यत् पत्रं निर्मितम्। अस्मिन् पत्रे निर्वाचनार्थं सूचना दत्ता, २७ जूनयावत् च एतत् पत्रं गोपायितं रक्षितम्। सः अवदत् यत् २७ जूनदिनाङ्के अपरं पत्रं निष्कासितं, यस्मिन् भाजपायाः द्वयोः निर्वाचितपार्षदयोः विरुद्धं षड्यन्त्रं रचितम्। अस्मिन् सुक्खु-सर्वकारः एकाम् अधिसूचनां प्रेषयति, यया मण्डलायुक्तः निगमस्य निर्वाचितपार्षदयोः सदस्यतां निरस्तं कर्तुं अधिकृतः क्रियते। पत्रे लिखितं यत् एतत् केवलं निगमसदस्यानां कृते एव अधिकृतम् अस्ति। सः अवदत् यत् एतदर्थं नगरविकासविभागः, ग्रामविकासविभागः इत्यादयः अपि ग्रहीतुं शक्यन्ते स्म, परन्तु जनतायाः निर्वाचितप्रतिनिधिषु आघातं कर्तुं तथा महापौर-उपमहापौरयोः निर्वाचनं बलात् ग्रहीतुं (हाईजैक कर्तुं) एतत् षड्यन्त्रं कृतम्। डॉ. बिन्दलः अवदत् यत् सुक्खू-शांडिल-सर्वकारः नीचतमस्तरं प्राप्तवान् अस्ति। अतः अस्मात् सर्वकारात् कस्यापि प्रकारस्य निकृष्टकार्यस्य अपेक्षा कर्तुं शक्यते। सः प्रश्नं कृतवान् यत् सोलननगरे एकस्मिन् मासे न तु मुख्यमन्त्री, न मन्त्री, न विधायकः, न च कोऽपि अधिकारी परिवर्तितः। यदा द्वाभ्यां पार्षदाभ्यां नामाङ्कनं कृतं, तदा तेषामेव अधिकारिणां समये सर्वं वैधम् आसीत्, यदा च तौ निर्वाचनं जितवन्तौ, तदा काङ्ग्रेसदलं षड्यन्त्रं कर्तुम् उद्यतम् अभवत्, तयोः विरुद्धं अभियोगं च पञ्जीकृतवान्। सः अवदत् यत् निगमं हस्तगतं कर्तुं संविधानस्य नियमानां च काङ्ग्रेसदलं नाशं करोति। भाजपा अस्य विरुद्धं मार्गेषु युद्धं करिष्यति, सर्वकारः प्रशासनं च एतदर्थं उत्तरदायी भविष्यति। सः अवदत् यत् पूर्वं मासमेकं यावत् शपथग्रहणं विलम्बितं कृतं, ततः काङ्ग्रेसस्य इङ्गितेन महापौर- उपमहापौरयोः निर्वाचनमपि त्रिचतुरदिनानि यावत् स्थगितं कृतम्।

# दिल्लीति राष्ट्रिय-राजधानी-क्षेत्रे एस. आई. आर. इत्युक्ते मतदातृणां विशेष-गहन-पुनरीक्षण इति अभियानं प्रारब्धम्



राष्ट्रिय-राजधानी-क्षेत्रे एस. आई. आर. इत्युक्ते मतदातृणां विशेष-गहन-पुनरीक्षण इति अभियानान्तर्गतं मतदातृभ्यः निर्वाचक-गणना-प्रपत्राणां प्रतिगृह-वितरणाभियानम् अद्यारभ्यते। देहली-नगरस्य मुख्य निर्वाचन अधिकारी अशोककुमारः गतदिने नवदेहली-नगरे प्रसारमाध्यमान् सम्बोधयन् एतत् अघोषयत् यत् मतदानकेन्द्रस्तरीय-बी. एल. ओ. इत्याख्याः अधिकारिणः श्वस्तनादारभ्य अग्रिममासस्य नवविंशति- दिनाङ्कपर्यन्तं कार्यमिदं सम्पादयिष्यन्ति। श्रीकुमारः अवदत् यत् अगस्त-मासस्य पञ्चम-दिनाङ्कात् सेप्टेम्बर्-मासस्य चतुर्थ-दिनाङ्कपर्यन्तं अभियोगाः आक्षेपाश्च निवेदयितुं शक्यन्ते इति। अन्तिमा निर्वाचक-सूचिः अक्टोबर्-मासस्य सप्तम-दिनाङ्के प्रकाशिता भविष्यति।

# फीफा-विश्वचषके नॉक-आउट इति स्पर्धायां कनाडा-देशः दक्षिण

## आफ्रिकादेशं एक-शून्याङ्कान्तरेण पराजयत




फीफा-विश्वचषक-क्रीडायाः नॉक-आउट इति चरणे, संयुक्तराज्यामेरिकादेशस्य लास्-एञ्जलीस्-नगरे प्रथमायाः नॉक-आउट इति स्पर्धायां कनाडा-देशः दक्षिण आफ्रिकादेशं एक-शून्याङ्कान्तरेण पराजयत। अद्य रात्रौ च संयुक्तराज्यामेरिकादेशस्य ह्यूस्टन्-क्रीडाङ्गणे राउण्ड्-आफ्-32-क्रीडाचक्रे ब्राजील्-देशः जपान् देशेन सह क्रीडिष्यति। क्रीडा भारतीय समयानुसारं रात्रौ सार्धदश-वादने आरप्स्यते। अन्यस्मिन् राउण्ड्-आफ्-32-इति क्रीडाचक्रे जर्मनी-देशः अमेरिकादेशस्य बोस्टन्-क्रीडाङ्गणे रात्रौ द्वि-वादने पराग्वे-देशेन सह क्रीडिष्यति।



# बैडमिण्टन्-क्रीडा

बैडमिण्टन्-क्रीडायां भारतीयः क्रीडकः किदंबी श्रीकान्तः यू. एस्. ओपन्-क्रीडायां पुरुष एकल-स्पर्धायां रजतपदकं प्राप्तवान्।

# श्री आदि हिमानी चामुण्डा मन्दिरम्





श्री आदि हिमानी चामुण्डा मन्दिरम् (यत् 'आदि हिमानी चामुण्डा देवी मन्दिरम्' अथवा संक्षेपेण 'हिमानी चामुण्डा' इति अपि कथ्यते) भगवतीं चामुण्डा देवीं समर्पितम् एकं प्राचीनं पूजनीयं च हिन्दू मन्दिरम् अस्ति। चामुण्डा देवी शक्तेः उग्ररूपं वर्तते (या सप्तमातृकासु अन्यतमा तथा एका महाविद्या अस्ति)। एतत् देव्याः मूलं (आदि) तथा अत्यधिकं शक्तिशाली निवासस्थानं मन्यते, यत् हिमाच्छादितेषु (हिमानी) धौलाधारपर्वतेषु उन्नतशिखरे स्थितम् अस्ति। एतत् मन्दिरं अधित्यकायां (घाटीक्षेत्रे) स्थितात् सुलभदर्शनयोग्यात् 'श्री चामुण्डा देवी मन्दिरतः' (चामुण्डा नन्दिकेश्वर धाम्नः) भिन्नम् अस्ति, यस्य स्थापना पश्चात् कालान्तरे सुलभपूजापाठाय कृता आसीत्।

**स्थानं प्राप्यता च (Location & Accessibility)**

एतत् मन्दिरं हिमाचलप्रदेशस्य काङ्गड़ा-जनपदे 'चन्दर भान' इत्यस्य समीपे 'जिया' ग्रामे प्रायः ३,१८५ मीटर (१०,४५० फीट) उन्नतस्थाने स्थितम् अस्ति। एतत् धर्मशाला-पालमपुर-राजमार्गे प्रसिद्धस्य चामुण्डामन्दिरस्य उत्तर-पूर्वदिशि वर्तते। अत्र केवलं पदयात्रा (ट्रेकिंग) माध्यमेन एव गन्तुं शक्यते: एकतः ९-१३ किलोमीटरमितः (उपरि गन्तुं ५-७ घण्टात्मकः) मध्यमः कठिनस्तरीयो वा मार्गः अस्ति। अस्य मुख्यमार्गः जियाग्रामात् (नगरोटा बगवान समीपे) अथवा जदराङ्गल/कारडियाना (अन्तिमं वाहनयोग्यं स्थानम्) तः आरभ्यते। मार्गे प्रस्तरसोपानानि (पत्थर की सीढ़ियां), वन्यमार्गाः, तृणावृतानि समतलक्षेत्राणि, तीव्रोत्थानं (खड़ी चढ़ाई) च सम्मिलितानि सन्ति। अस्य निकटतमानि नगराणि धर्मशाला (~३०-३५ किमी), पालमपुर (~२०-३० किमी), काङ्गड़ा च सन्ति। अस्य समीपस्थं विमानपतनं 'गग्गल (काङ्गड़ा) एयरपोर्ट' तथा च रेलस्थानकं 'पठानकोट' अथवा 'काङ्गड़ा' अस्ति।

**इतिहासः पौराणिकी कथा च (History & Mythology)**

एतत् मन्दिरं न्यूनतमात् सप्तदशशताब्दीतः (17th Century) विद्यमानम् अस्ति, यत् कटोचराजवंशस्य राज्ञः चन्दर भान चन्द कटोचस्य (मृत्युः १६६०) प्रासादस्य भग्नावशेषाणां समीपे स्थितम् अस्ति। शताब्द्याः उपेक्षायाः अनन्तरं १९९० तमे दशके भक्तवरेण पी.डी.सैनी महोदयेन स्थानीयजनैः च सह अस्य जीर्णोद्धारः कृतः; २०१४ तमे वर्षे वज्रपातेन (बिजली गिरने से) अग्निना च एतत् क्षतिग्रस्तम् अभवत्, ततः परं पुनः निर्मितम्।

**पौराणिकी कथाः** अस्मिन्नेव स्थाने देवी चामुण्डा चण्ड-मुण्डनामकौ राक्षसौ शिखरतः शिलाः प्रक्षिप्य हतवती (एका शिला अद्यापि घाटीमन्दिरस्य शिवलिङ्गस्य समीपे दृश्यते इति लोकमान्यता)। एतदेव देव्याः 'आदि स्थानं' मन्यते; तल्लीनमन्दिरं (घाटी का मंदिर) तु पश्चात् निर्मितं यदा ऋषिभिः दैनिकपूजार्थम् एकस्य सुलभस्थानस्य प्रार्थना कृता। चामुण्डा देवी असत्यस्य उपरि सत्यस्य विजयस्य, रक्षायाः, तान्त्रिकशक्तेः च प्रतीका अस्ति।

**महत्त्वं पूजा च (Significance & Worship)**

एतत् एकं सिद्धपीठम् (ऊर्जायुक्तं आध्यात्मिकं स्थानम्) अस्ति यत्र शत्रुभ्यः बाधाभ्यः च मुक्तये दैवीकृपा प्रार्थ्यते। अधित्यका-मन्दिरस्य (घाटी वाले मंदिर की) तुलनायाम् एतत् स्थानं शान्तं तथा न्यूनजनसम्मर्दयुक्तं (कम भीड़भाड़ वाला) वर्तते, यत् प्रकृतेः अङ्के ध्यानाय आदर्शम् अस्ति।

**सौविध्यम्** अत्र शय्या-पात्रादियुक्ता एका सामान्या विश्रामशाला (सराय) अस्ति; मार्गे चहा-पानस्य आपणाः सन्ति (परं अर्धमार्गस्य परं जलं सहैव नयत)।

**ऋतुकालः:** एतत् मन्दिरं ऋतु अनुसारं १५ मार्चतः १५ नवम्बर पर्यन्तम् एव उद्घाटितं भवति (अत्यधिकहिमपातात् शीतकाले पिहितः भवति)।

**उत्तमः समयः-:** अप्रैल–जून अथवा सितम्बर–अक्टूबर मासाः भ्रमनाय उत्तमाः सन्ति (वर्षाकालस्य पिच्छिलमार्गेभ्यः रक्षेत्)। एषा पदयात्रा आध्यात्मिकतीर्थाटनं साहसिकयात्रया सह सञ्योजयति, या आगन्तुकेभ्यः काङ्गड़ाघाट्याः तथा हिमाच्छादितशिखराणां नयनमनोहरं दृश्यं प्रदाति। ये जनाः शान्तिं शुद्धां दैवीऊर्जां च अन्विष्यन्ति, तेषाम् कृते एषः कश्चन निगूढः मणिः (छिपा हुआ रत्न) अस्ति।

## सर्वकारः पेट्रोल-डीजल-इन्धनयोः विक्रयणं वितरणं च नियन्त्रयतः अस्थायी-नियामक-उपायान् प्रत्यहतवान्

सर्वकारेण पेट्रोल-डीजल-इन्धनयोः विक्रयणं वितरणं च नियन्त्रयन्तः अस्थायी-नियामक-उपायाः प्रत्यहृताः सन्ति। पेट्रोलियम-प्राकृतिकगैस-मन्त्रालयेन उक्तं यत् प्रथमात् जुलाई-दिनाङ्कात् सार्वजनिकक्षेत्रस्य तैलविपणनसंस्थानां (ओइल मार्केटिंग कम्पनीनां) खुदरा-विक्रयकेन्द्रेभ्यः मोटर-स्पिरिट् (पेट्रोल) तथा च उच्चगति-डीजल इत्यनयोः उपरि एते अस्थायी-उपायाः निरसिष्यन्ते। पश्चिम-एशिया-सङ्घर्षात् उत्पन्नानां परिस्थितीनां कारणात् सर्वकारेण पेट्रोल-डीजलयोः खुदरा-मूल्यानि स्थिरीकृत्य खुदरा-उपभोक्तारः अन्तर्राष्ट्रिय-इन्धन-मूल्येषु जातया तीव्रवृद्धया रक्षिताः। अनेन खुदरा-इन्धन-मूल्येषु थोक-उपभोक्तृभ्यः (थोक उपभोक्ताओं के लिए) प्रयुक्तेषु मूल्येषु च महद् अन्तरं सञ्जातम्। मन्त्रालयेन प्रतिपादितं यत् अस्याः स्थितेः निवारणाय १२ जून्-दिनाङ्कात् प्रवर्तितैः अस्थायी-नियामक-उपायैः खुदरा-विक्रयकेन्द्रेषु प्रतिग्राहकं प्रतिवाहनं वा प्रतिवासरं २०० लीटर परिमितस्य उच्चगति-डीजलस्य (हाई स्पीड डीजल) अस्थायी-सीमा निर्धारिता आसीत्, औद्योगिक-संस्थागत-वाणिज्यिक-उपभोक्तृभ्यः च अस्य उपयोगः अनिवार्यः कृतः आसीत्।




## श्रद्धाञ्जलिः

अस्तं याति न केवलं रविरयं विद्याप्रदीपोऽपि यः
शास्त्राम्भोधितटेषु दीर्घसमयं सञ्चारमातन्वत।
श्रीमत्केशवरामशर्मसुधियि स्वर्गं गते दुःखितं
विद्वद्वृन्दमिदं निराशहृदयं मौनं जगद्वर्तते॥

**संदेशकः -वत्सदेशराजशर्मा**
**संस्थापकाध्यक्षो,वैदिकगणः, भारतम्**



## "लौकिकन्यायकोशः"
## "कण्ठचामीकरन्यायः"

चामीकरं नाम सुवर्णम्। तेन निर्मितम् आभरणम् अपि चामीकरमेव। कण्ठे सुवर्णस्य हारः इत्यपि तस्य अर्थः भवितुम् अर्हति। मूर्खः स्वस्य कण्ठे वर्तमानं सुवर्णहारं न जानाति तथैव मनुष्यः परमार्थतः ब्रह्मस्वरुपः सन्नपि अज्ञानेन भिन्नं मन्यते। केनापि गुरुणा तस्य बोधः करणीयः भवति। पश्यन्तु-

*"प्रत्यगात्मतया तस्य प्राप्तत्वेऽपि च सर्वदा।*
*कण्ठचामीकरन्यायात् तत्प्राप्तिरुपचर्यते।।"*

**डा. वर्षा प्रकाश टोणगांवकर पुणे/ महाराष्ट्रम्**




## वार्ता-संवादः

**नन्दिनी-** नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये। अद्यतनं विचित्रं वृत्तं शृणु। जापानदेशे नवीनं शक्तिमिश्रितं मधुरशीतलं पयः विक्रीतम्। एतत् आस्वाद्य केचन जनाः बहु विस्मिताः जाताः।

**काव्या-** मया तु एतादृशं भोजनं कदापि न इष्टम्। लवणयुक्ता शुक्तिः मधुरे पयसि कथं योजिता इति न ज्ञायते। अपरं वृत्तं शृणु- कनाडादेशीय-नगरे एकं विशालं गोलक-भवनं क्रीडोत्सवस्य निमित्तं बृहत्-पादकन्दुकस्य रूपेण परिवर्तितम्।

**नन्दिनी-** सत्यम्, तत् बृहत् कन्दुक-भवनं क्रीडाप्रेमिभिः बहु श्लाघितम्। विज्ञानक्षेत्रे अपि नूतनवृत्तं प्राप्तम्। सञ्ज्ञाहरौषधेन सञ्ज्ञाहीनदशायां स्थितानां रुग्णानां मस्तिष्केण अपि भाषा-ग्रहणस्य प्रयत्नः कृतः इति वैज्ञानिकैः ज्ञातम्।

**काव्या-** अहो आश्चर्यम्! प्रसुप्त-दशायाम् अपि मस्तिष्कस्य एतादृशं कार्यं पूर्वं कदापि न लक्षितम्। अन्ते एकं प्रान्तीयं वृत्तं वर्तते। भारतस्य बेङ्गलूरु-नगरे एकः त्रिचक्रिका-चालकः स्वस्य दैनन्दिनकार्याय आधुनिक-कृत्रिमबुद्धि-संलापकम् उपयुक्तवान् अस्ति। तस्य कार्यं दृष्ट्वा तस्य संलापकस्य निर्मात्री संस्था अपि कन्नड-भाषया एव तस्मै प्रत्युत्तरं दत्तवती अस्ति।

**नन्दिनी-** अहो, तस्य चालकस्य कार्यं मया बहु श्लाघितम्। तन्त्रज्ञानस्य विस्तारः सर्वत्र जातः। अद्यतनः कार्यक्रमः समाप्तः। पुनर्मेलिष्यामः।